श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## शरणागति दीपिका

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

पद्मा पतेः स्तुति पदेन विपच्य मानं
पश्यन्त्विह प्रपदन प्रवणा महान्तः।
मद्वाक्य संवलितम् अपि अजहत् स्वभावम्
मान्यम् यतीस्वर महानस संप्रदायम्॥१

नित्यम् श्रिया वसु धया च निषेव्य माणम्
निर्व्याज निर्भर दया भरितं विभाति।
वेदान्त वेद्यमिह वेगवती समीपे
दीप प्रकाश इति दैवतं अद्वितीयम्॥२

दीपस् त्वमेव जगतां दयिता रुचिस्ते
दीर्घं तमः प्रति निवर्त्यमिदम् युवाभ्याम्।
स्तव्यम् स्तव प्रियमतः शरणोक्ति वश्यम्
स्तोतुम् भवन्तं अभिलष्यति जन्तु रेषः॥३

पद्म कराद् उपगता परिषस्वजे त्वाम्
वेगा सरिद् विहरणा कल शाब्धि कन्या।
आहुस्तदा प्रभृति दीप समाव भासम्



rmvenkat@yahoo.com

आजानतो मरकत प्रतिमं वपुस्ते ॥४

स्वामिन् गभीर सुभगं श्रम हारि पुंसां
माधुर्य रम्यम् अनघं मणि भङ्ग दृश्यम्
वेगान्तरे वितनुते प्रति बिम्ब शोभां
लक्ष्मी सरः सरसिज आश्रयं अङ्गकं ते ॥५

आविश्य धारयसि विश्वं अमुष्य यन्ता
शेषी श्रियः पतिर् अशेष तनुर् निदानम्।
इत्यादि लक्षण गणैः पुरुषोत्तमं त्वां
जानाति यो जगति सर्वविद् एष गीतः ॥६

विश्वम् शुभाश्रयवदीश वपुस् त्वदीयं
सर्वा गिरस्त्वयि पतन्ति ततोऽसि सर्वः।
सर्वे च वेद विधयस् त्वदनुग्र हार्थाः
सर्वाधिकस् त्वमिति तत्व विदस् तदाहुः ॥७

ज्ञानम् बलम् नियमन क्षमताऽथ वीर्यम्
शक्तिश्च तेज इति ते गुण षट्कम् आद्यम्।
सर्वाति शायिनि हिमो पवनेश यस्मिन्
अन्तर् गतो जगदिव त्वयि सद्गुणौघः ॥८

दीपावभास दयया विधि पूर्वमेतत्
विश्वं विधाय निगमानपि दत्त वन्तम्।
शिष्यायिताः शरणयन्ति मुमुक्षवस्त्वाम्
आद्यम् गुरुं गुरु परम्परया अधिगम्यम् ॥९

सत्ता स्थिति प्रयतन प्रमुखैर् उपात्तम्

स्वार्थम् सदैव भवता स्वयमेव विश्वम्।
दीप प्रकाश तदिह त्वद् अवाप्तये त्वाम्
अव्याज सिद्धम् अनपायम् उपायम् आहुः॥१०

भोग्यम् मुकुन्द गुण भेदम् अचेत नेषु
भोक्तृत्वम् आत्मनि निवेश्य निजच्छयैव।
पाञ्चालिका शुक विभूषण भोग दायी
सम्राडिव आत्म समया सह मोदसे त्वम्॥११

त्वाम् मातरम् च पितरम् सहजं निवासं
सन्तः समेत्य शरणं सुहृदं गतिं च।
निः सीम नित्य निरवद्य सुख प्रकाशं
दीप प्रकाश सविभूति गुणं विशन्ति॥१२

जन्तोर् अमुष्य जनने विधि शम्भु दृष्टौ
रागादिनेव रजसा तमसा च योगः।
द्वैपायन प्रभृतयस् त्वदवेक्षि तानां
सत्वम् विमुक्ति नियतं भवति इति उशन्ति॥१३

कर्मस्वनादि विषमेषु समो दयालुः
स्वेनैव् ुप्तम् अपदेशं अवेक्ष माणः।
स्वप्राप्तये तनुभृतां त्वरसे मुकुन्द
स्वाभिविकम् तव सुहृत्वम् इदम् गृणन्ति॥१४

निद्रायितान् निगम वर्त्मनि चारु दर्शी
प्रस्थान शक्ति रहितान् प्रति बोध्य जन्तून्।
जीर्ण स्तनन्धय जडान्ध मुखा निवास्मान्
नेतुं मुकुन्द यतसे दयया सह त्वम्॥१५

भक्तिः प्रपत्तिर् अथवा भगवन् तदुक्तिः
तन्निष्ठ संश्रय इतीव विकल्प्य मानम्।
यं कञ्चिदेकं उपपाद यता त्वयैव
त्रातास् तरन्ति अवसरे भविनो भवाब्धिम्१६

नाना विधैर् अकपटैर् अजहत् स्वाभावैः
अप्राकृतैर् निज विहार वशेन सिद्धैः।
आत्मीय रक्षण विपक्ष विनाशनार्थैः
संस्थापयसि अनघ जन्मभिर् आद्य धर्मम्॥१७

निम्नोन् नतानि निखिलानि पदानि गाढम्
मज्जन्ति ते महिम सागर शीकरेषु।
नीरन्ध्रम् आश्रयसि नीच जनान् तथाऽपि
शीलेन हन्त शिशिरोपवन ईश्वर त्वम्॥१८

काशी वृकान्धक शरासन बाण गङ्गा
संभूति नाम कृति संवदन आदि उदन्तैः।
स्वोक्ति अम्बरीष भय शाप मुखैश्च शम्भुं
त्वन्निघ्नं ईक्षितवताम् इह कः शरण्यः॥१९

क्वासौ विभुः क्व वयम् इति उपसत्ति भीतान्
जन्तून् क्षणात् त्वद् अनुवृत्तिषु योग्य यन्ती।
संप्राप्त सद्गुरु तनोः समये दयालोः
आत्मावधिर् भवति संस्कृत धीः क्षणं ते॥२०

योग्यं यमैश्च नियमैश्च विधाय चित्तम्
सन्तो जिता सनतया स्ववशासु वर्गाः।

प्रत्या हृतेन्द्रिय गणाः स्थिर धारणास्त्वां
ध्यात्वा समाधि युगलेन विलोकयन्ति ॥२१

पद्माभिराम वदनेक्षण पाणि पादम्
दिव्यायु धाभरण माल्य विलेपनं त्वाम् ।
योगेन नाथ शुभं आश्रयम् आत्म वन्तः
सालम्बनेन परिचिन्त्य न यान्ति तृप्तिम् ॥२२

मानाति लङ्घि सुख बोध महाम्बुराशौ
मास् त्रिसीम वहिते भवतः स्वरूपे ।
ताप त्र्येण विहतिं न भजन्ति भूयः
संसार घर्म जनितेन समाधिमन्तः ॥२३

धी संस्कृतान् विदधताम् इह कर्म भेदान्
शुद्धं जिते मनसि चिन्तयतां स्वमेकम् ।
त्वत्कर्म सक्त मनसाम् अपि चापरेषां
सूते फलानि अभिमतानि भवान् प्रसन्नः ॥२४

उद्बाहु भावमपहाय यथैव खर्वः
प्रांशुम् फलार्थं अभियाचति योगि चिन्त्य ।
एवम् सुदुष्करम् उपाय गणां विहाय
स्थाने निवेशयति तस्य विचक्षणः त्वाम् ॥२५

नित्यालसार्हम् अभयं निरपेक्षम् अन्यैः
विश्वाधिकारं अखिलाभिमत प्रसूतिम् ।
शिक्षा विशेष शुभगं व्यवसाय सिद्धाः
सत्कुर्वते त्वयि मुकुन्द षडङ्ग योगम् ॥२६

त्वत् प्रातिकूल्य विमुखाः स्फुरद् आनुकूल्याः
कृत्वा पुनः कृपणताम् विगताति शङ्काः।
स्वामिन् भव स्वयं उपाय इतीरयन्तः
त्वयि अर्पयन्ति निज भारं अपार शक्तौ॥२७

अर्थान्तरेषु विमुखान् अधिकार हानेः
श्रद्धाधनान् त्वद् अनुभूति विलम्ब भीतान्।
दीप प्रकाश लभसे सुचिरात् कृतीव
न्यस्तात्मनस्तव पदे निभृतान् प्रपन्नान्॥२८

मन्त्रैर् अनुश्रव मुखेष्वधि गम्य मानैः
स्वाथि क्रिया समुचितैर्यदि वाऽन्य वाख्यैः।
नाथ त्वदीय चरणौ शरणं गतानां
नैवायुतायुत कलाऽप्यपरैर् अवाप्या॥२९

दत्ताः प्रजा जनकवत् तव देशिकेन्द्रैः
पत्याऽभिनन्द्य भवता परिणीय मानाः।
मध्ये सतां महित भोग विशेष सिद्ध्यैः
माङ्गल्य सूत्रमिव बिभ्रति किङ्करत्वम्॥३०

दिव्ये पदे नियत किङ्करताधि राज्यम्
दातुं त्वदीय दयया विहिताभिषेकाः।
आदेह पातम् अनघाः परिचर्यया ते
युञ्जान चिन्त्य युव राज पदं भजन्ति॥३१

त्वां पाञ्चरात्रिक नयेन पृथग् विधेन
वैखानसेन च पथा नियताधि काराः
संज्ञा विशेष नियमेन समर्चयन्तः

प्रीत्या नयन्ति फलवन्ति दिनानि धन्याः ॥३२

वर्णाश्रम् आदि नियत क्रम सूत्र बद्धा
भक्त्या यथार्ह विनिवेशित पत्र पुष्पा
मालेव काल विहिता हृदयङ्गमा त्वाम्
आमोदयति अनुपराग धियां सपर्या ॥३३

ब्रह्मा गिरिश इतरेऽप्यमरा य एते
निर्धूय तान् निरय तुल्य फल प्रसूतीन्।
प्राप्तुं तवैव पद पद्म युगं प्रतीताः
पातिव्रतीं त्वयि वहन्ति परावरज्ञाः ॥३४

नाथ त्वदिष्ट विनियोग विशेष सिद्धं
शेषत्व सारम् अनपेक्ष्य निजं गुणज्ञाः।
भक्तेषु ते वर गुणार्णव पार तन्त्र्यात्
दास्यं भजन्ति विपणि व्यवहार योग्यम् ॥३५

सद्भिस् त्वदेक शरणैर् नियतं सनाथाः
सर्पादिवत् त्वद् अपराधिषु दूर याताः।
धीरास् तृणीकृत विरिञ्चि पुरन्दराद्याः
कालं क्षिपन्ति भगवन् करणैर् अवन्ध्यैः ॥३६

वागादिकं मनसि तत् पवने स जीवे
भूतेष्वयं पुनरसौ त्वयि तैः समेति।
साधारणोत् क्रमण कर्म समाश्रितानां
यन्त्रा मुकुन्द भवतैव यथा यमाधेः ॥३७

सव्यान्ययोर् अयनयोर् निशि वासरे वा

सङ्कल्पितायुर् अवधीन् सपदि प्रपन्नान्।
हार्दः स्वयं निज पदे विनिवेशयिष्यन्
नाडीं प्रवेशयसि नाथ शताधिकां त्वम्॥३८

अर्चिर् दिनं विशद पक्ष उदव प्रयाणम्
संवत्सरो मरुद शीतकरः शशाङ्कः।
सौदामनी जलपतिर् वलजित् प्रजेशः
इत्याति वाहिक सखो नयसि स्वकीयान्॥३९

त्वच्छेष वृति अनुगुणैर् महितैर् गुणौघैः
आविर्भवत्य यत सिद्ध निज स्वरूपे।
त्वल्लक्षणेषु नियतेष्वपि भोग मात्रे
साम्यं भजन्ति परमं भवता विमुक्ताः॥४०

इत्थं त्वदेक शरणैर् अनघैर वाप्ये
त्वत् किङ्करत्व विभवे स्पृहया अपराध्यन्
आत्मा ममेति भगवन् भवतैव गीता
वाचो निरीक्ष्य भरणीय इह त्वयाऽहम्॥४१

पद्मा मही प्रभृतिभिः परिभुक्त भूम्नः
का हानिरत्र मयि भोक्तरि ते भवित्री।
दुष्येत् किमङ्घ्रि तटिनी तव देव सेव्या
दुर्वार तर्ष चपलेन शुनाऽवलीढा॥४२

सत्त्वानि नाथ विविधानि अभि सञ्जिघृक्षोः
संसार नाट्य रसिकस्य तवास्तु तृप्त्यै।
प्रत्यक् पराङ्मुख मतेर् असमीक्ष्य कर्तुः
प्राचीन सज्जन विडम्बन भूमिका मे॥४३

कर्तव्यम् इति अनुकलम् कलयामि कृत्यम्
स्वामिन् न कृत्यमिति कृत्यमपि त्यजामि ।
अन्यद् व्यतिक्रमण जातं अनन्तम् अर्थ-
स्थाने दया भवतु ते मयि सार्व भौमी ॥४४

यम् पूर्वम् आश्रित जनेषु भवान् यथावत्
धर्मम् परं प्रणिजगौ स्वयम् आनृशम्स्यम् ।
संस्मारितस् तदसि तस्य शरण्य भावात्
नाथ त्वमात्म समया ननु मादृशार्थम् ॥४५

त्राणं भवेति सकृद् उक्ति समुद्य तानाम्
तैस्तैर् असह्य वृजिनैर् उदरं भरिस्ते ।
सत्यापिता शतमखात्मज शङ्करादौ
नाथ क्षमा न खलु जन्तुषु मद्विवर्जम् ॥४६

कर्मादिषु त्रिषु कथां कथमपि अजानन्
कामादि मेदुरतया कलुष प्रवृत्तिः ।
साकेत संभव चराचर जन्तु नीत्या
वीक्ष्यः प्रभो विषय वासितया अप्यहं ते ॥४७

ब्रह्माण्ड लक्ष शत कोटि गणान् अनन्तान्
एक क्षणे विपरिवर्त्य विलज्जमानाम् ।
मत्पाप राशि मथने मधु दर्प हन्त्रीम्
शक्तिं नियुङ्क्ष्व शरणागत वत्सल त्वम् ॥४८

आस्तां प्रपत्तिर् इह देशिक साक्षिका मे
सिद्धा तदुक्तिर् अनघा त्वदपेक्षि तार्था

न्यस्तस्य पूर्व निपुणैस् त्वयि नन्विदानीं
पूर्णे मुकुन्द पुनरुक्त उपाय एषः ॥४९

यद्वा मदर्थ परिचिन्त नया तवालं
संज्ञां प्रपन्न इति साहसिको बिभर्मि ।
एवम् स्थिते त्वद्पवाद निवृत्तये मां
पात्री कुरुष्व भगवन् भवतः कृपायाः ॥५०

त्यागे गुणेश शरणागत संज्ञिनो मे
स्त्यानागसोऽपि सहसैव परिग्रहे वा ।
किं नाम कुत्र भवतीति कृपादिभिस्ते
गूढं निरूपय गुणेतर तार तम्यम् ॥५१

स्वामी दया जलनिधिर् मधुरः क्षमावान्
शीलाधिकः श्रित वशः शुचिर् अत्युदारः ।
एतानि हातु मनघो न किलार्हसि त्वम्
विख्याति मन्ति बिरुदानि मया सहैव ॥५२

वेला धनञ्जय रथादिषु वाचिकैः स्वैः
आघोषिताम् अखिल जन्तु शरण्यतां ते ।
जानन् दशानन शताद् अधिकागसोऽपि
पश्यामि दत्तम् अभयं स्वकृते त्वया मे ॥५३

रक्षयस् त्वया तव भरोऽस्म् यहमित् यपूर्वान्
वर्णानिमा न हृदयानपि वाचयित्वा ।
मद्दोष निर्जित गुणो महिषी समक्षं
मा भूस्त्व दन्य इव मोघ परिश्रमस्त्वम् ॥५४

मुख्यं च यत् प्रपदनं स्वयमेव साध्यं
दातव्य मीश कृपया तदपि त्वैयैव।
तन्मे भवच्च चरण सङ्गवतीं अवस्थां
पश्यन् उपाय फलयोर् उचितं विधेयाः॥५५

अल्पास्थिरैर् असिककैर् असुखा वसानैः
दुःखान् वितैर् अनुचितैर् अभिमान मूलैः।
प्रत्यव परागनुभवैः परिघूर्णितम् मां
त्वय्येव नाथ चरितार्थय निर्विविक्षुम्॥५६

तत्त्वाव बोध शमित प्रतिकूल वृत्तिं
कैङ्कर्य लब्ध करण त्र्य सामरस्यम्।
कृत्वा त्वदन्य विमुखं कृपया स्वयं मां
स्फातिं दशोः प्रतिलभस्व जगज्जनन्याः॥५७

इत्थं स्तुति प्रबृतयो यदि संमताः स्युः
यद्वापराध पदवीषु अभि संविशन्ति।
स्तोकानुकूल्य कणिका वश वर्तिनस्ते
प्रीति क्षमा प्रसरयो अहं अस्मि लक्ष्यम्॥५८

स्नेहोपपन्न विषयः स्व दशा विशेषात्
भूयस्तमिस्त्र शमिनीं भुवि वेङ्कटेशः।
दिव्यां स्तुतिं निरमिमीत सतां नियोगात्
दीप प्रकाश शरणगति दीपिकाख्याम्॥५९

कवितार्किक सिंहाय कल्याण गुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः॥